**प्रश्नः 121. मानस्वरस्य आदर्शस्वरस्य वा (Cardinal Vowels) सचित्रविवेचनं निरूपयत ।**

**उत्तरम्**–प्रो. डेनियल-जॉन्स-महोदयेन 'मानस्वरस्य' कल्पना कृता । इमे स्वराः कस्यापि भाषा-विशेषेन सम्बद्धाः न सन्ति; अपितु काल्पनिकाः सन्ति । अत एव इमे 'मानकस्वराः' आदर्श-स्वराः वा कथ्यन्ते भाषाविद्भिः । एतेषां व्यावहारिक-उपयोगिता इयमस्ति यद् अनेन साहाय्येन कस्यापिभाषा-विशेषस्य स्वराणाम् उच्चारण-प्रक्रियायाः सम्यक्-निर्धारणं कर्तुं शक्यते । पूर्णरूपेण कस्यामपि भाषायाम् इमे स्वराः नोपलभ्यन्ते; परन्तु आंशिकरूपेण सर्वासु भाषासु प्राप्यन्ते । एतेषां 'मान-स्वराणां' सचित्र-विवेचनम् अधो लिखितमस्ति–




सुस्पष्टमिदं यत् इ, ए, ऍ, अ ऽ इति चत्वारः अग्रस्वराः तथा उ, ओ, ओॅ, आ ऽऽ इति चत्वारः पश्चस्वराः सन्ति । एतेषु अष्टस्वरेषु इ, उ संवृतौ, ए, ओ अर्धसंवृतौ, ऍ, ओॅ अर्धविवृतौ, अ, आ इति विवृतौ स्तः ।

## 3.4. ध्वनि-परिवर्तकानि कारणानि (Causes of Phonetic Changes)

**प्रश्नः 122. ध्वनिपरिवर्तनस्य कति कारणानि भेदोपभेद-पुरस्सरं संक्षेपेण विवेचयत ।**

**उत्तरम्**–परिवर्तनशीलस्य मानवस्य भाषायामपि परिवर्तनं स्वाभाविकमेवास्ति । इदम् परिवर्तनमेव तस्याः भाषायाः परिवर्द्धनस्यापि कारणं भवति । परिवर्द्धनोऽयं तस्याः विकास इत्यभिधीयते । भाषाविषयकं परिवर्तनमिदम् अतीव शनैः-शनैः मन्दगत्या भवति; अतः कोऽपि एनं परिवर्तनं सहसा द्रष्टुं ज्ञातुं वा न शक्नोति । या प्राग्विभाषा भवति, सैव कालक्रमेण परिवर्तनमुद्गरेण ताड्यमाना भाषायाः स्थानं प्राप्नोति । यद्यपि भाषा सर्वथा स्वच्छंदा नहि भवति, अपितु नियमैः परम्पराभिश्च बद्धा भवति, तथापि कालक्रमेण प्राचीनासु परिस्कृतास्वपि भाषासु परिवर्तनमिदं तु भवत्येव; यतः भाषा, स्वाभाविकरूपेण स्वतः प्रवाहशीलाऽस्ति ।

इत्थं भाषायाः परिवर्तनशीलत्वात् तस्यां जायमानस्य परिवर्तनस्य प्रारम्भः ध्वनि-परितर्वनादेव भवति; यद्यपि ध्वनिः, रूपम्, अर्थश्च भाषायाः त्रीणि प्रधानान्यंगानि सन्ति, एतेषु परिवर्तनपि भवत्येव; तथापि ध्वनिपरिवर्तनस्य ध्वनिविकारस्य वा अतीव वैशिष्ट्यपूर्णम् स्थानमस्ति । सर्वे जानन्त्येव यत् ध्वनेः सम्बन्धो देशेन कालेन व्यक्त्या च भवति । अतएव इमानि त्रीणि कारणानि एव ध्वनिविकारमुत्पादयन्ति । एतेषां समेषां कारणानां भागद्वये विभागः कर्तुं शक्यते,–(i) बाह्य-कारणम्, (ii) आभ्यन्तरकारणञ्च ।

1. **बाह्यकारणम्** (External Cause)–भौगोलिक-ऐतिहासिक-सांस्कृतिक-साहित्यिक-वैज्ञानिक-वैयक्तिकाख्याः षड्-संवर्गाः सन्ति ध्वनिपरिवर्तनस्य बाह्यकारकाणाम्, येषां सांकेतिकं विवरणम् अधोलिखितम् अस्ति–

(i) **भौगोलिककारणम्**–भौगोलिककारणान्यपि ध्वनि-परिवर्तनं प्रोत्साहयन्ति । केषाञ्चन भाषावैज्ञानिकानां देवेन्द्र-नाथशर्मादीनां मतमस्ति यत् जलवाय्वादिकानां भौगोलिक-कारकानां प्रभावः स्वरयन्त्रेऽप्यापतति । एतस्माद् कारणादेव भिन्नदेशीयाः जनाः भिन्न-भिन्न प्रकारेण शब्दोच्चारणे सामर्थ्यशीलाः भवन्ति । प्रयत्नबलेन परकीयाणां भाषाणामपि कोऽपि उच्चारणं कर्तुं शक्नोति, किन्तु तादृक् नैपुण्यं नैव अवाप्नोति यादृक् स्वकीयायाः भाषायाः उच्चारणे भवति; परन्तु कारकस्यास्य महत्त्वमत्यल्पमस्ति ।

(ii) **ऐतिहासिक-कारणम्**–कालक्रमेण ऐतिहासिक-प्रभावादपि ध्वनिविकारः भवत्येव । यथा वैदिक-कालाद् आरभ्य वर्तमानकाल-पर्यन्तं संस्कृत-वर्णानाम् उच्चारणे नैकविधं परिवर्तनं दरीदृश्यते । कस्यापि प्राचीनायाः भाषायाः तुलना यदा अर्वाचीनया भाषया समं क्रियते, तदा ज्ञायते यत् कालक्रमेण भाषायां कियत् परिवर्तनं सञ्जातम् । या प्राग्विभाषा आसीत् सैव सम्प्रति भाषायाः स्थाने प्रतिष्ठिताऽस्ति । इत्थं सुस्पष्टमिदं यत् प्राचीनासु संस्कृतादिषु परिष्कृताष्वपि भाषासु कालक्रमेण निरन्तरं परिवर्तनं भवत्येव ।

(iii) **सांस्कृतिक-कारणम्**–सांस्कृतिकाभ्युत्थानेन समं राजनैतिक-व्यापारिकसम्बन्धादिभिः अपि भाषायां परिवर्तनं भवत्यनिवार्यरूपेण । अर्थात्, सांस्कृतिकपुनर्जागरणस्य प्रभावाद् भाषाऽपि प्रभाविता भवति । यथा आंग्लसंस्कृति-संक्रमिते भारतवर्षेऽस्मिन् सर्वासु भाषासु न्यूनाधिकमॉग्लप्रभावं सर्वत्र द्रष्टुं शक्यते । सुस्पष्टमिदं यत् विजेता-देशस्य भाषायाः प्रभावः पराजित-देशस्य भाषायाम् अवश्यमेवावलोक्यते ।

(iv) **साहित्यिक-कारणम्**–ध्वनिपरिवर्तने साहित्यिक-कारकस्यापि महती भूमिका अस्ति । देवकीनन्दन-खत्री-महोदयस्य 'चन्द्रकान्ता' इत्युपन्यासस्य रसास्वादनाय लक्षाधिकाः जनाः हिन्दी-भाषायाः अध्ययनं कृतवन्तः । तुलसिदासेनवि-

Scanned with OKEN Scanner

रचितस्य रामचरितमानसस्य शब्दाः न्यूनाधिकाः सम्प्रति सर्वत्र मिलन्त्येव । किम्बहुना मध्ययुगीनां भक्ति-कवीनां रचनाभिः प्रभाविताः कवयः संस्कृतं विहाय हिन्दीमेव काव्यक्षेत्रं स्वीकृतवन्तः ।

(v) **वैज्ञानिक-कारणम्**—वैज्ञानिकाविष्कारेण अपि भाषायां नवीनानां शब्दानां वृद्धिः भवति । नैकधा तु प्राचीनशब्देषु परिवर्तनं कृत्वा तदर्थबोधनाय नवीनाः शब्द-प्रयोगाः प्रचलन्ति । यथा 'अलंकारशास्त्रम्' इति स्थाने 'साहित्यशास्त्रम्' 'समीक्षा-शास्त्रम्' वा प्रचलति प्रायेण । अर्थशास्त्रम् इति स्थाने राजनीतिविज्ञानम्, कलकत्ता इति स्थाने कोलकाता इत्यादयः बहवः वैज्ञानिक-प्रभावनिष्ठाः ध्वनिविकाराः समुपलभ्यन्ते सर्वेषु देशेषु भाषासु च ।

(vi) **वैयक्तिक-कारणम्**—भाषिक-ध्वनेः उत्पादकः व्यक्तिः एव भवति । अतः ध्वनिविकारस्यापि सम्बन्धः व्यक्त्या सहैवास्ति । महाकवीनां वाल्मीकि-व्यास-कालिदास-तुलसिदासा-दीनां शब्दप्रयोगं सर्वे जनाः सानन्दं कुर्वन्त्येव । अतः व्यक्ति-भेदेन महापुरुषाणामपि भाषासु प्रभावः भवत्येव ।

2. **आभ्यन्तर-कारणम्** (Internal Cause)—आभ्यन्तर-कारणानि तु भाषास्वेव निहिताः भवन्ति । भावातिरेकः, बलम्, अपूर्णानुकरणं, प्रयत्नलाघवञ्च इत्येतानि चतुर्विधानि भवन्ति आभ्यन्तरकारणानि—

(क) **भावातिरेकः** (Admiration)—करुणा-प्रेम-क्रोध-दयाद्याधिक्येन शब्देषु ध्वनिषु वा विकृतिः सर्वत्र दृश्यते । भावाधिक्याद् प्रादुर्भूता विकृतिरियं ध्वनिपरिवर्तनम् इत्युच्यते । यथा—'बेटी' इति स्थाने बिटिया, 'बाबू' इति स्थाने बबुआ, 'बहन' इति स्थाने बहिनिया, 'राजा' इति स्थाने रजवा, 'लघु' इति स्थाने लहुरा, 'प्राण' इति स्थाने परनवा, 'माता' इति स्थाने माई (मावा) 'पुत्र' इति स्थाने पुत्तर (पुत्तुर), 'भाई' इति स्थाने भइया इत्यादिः ।

(ख) **बलम्** (Stress)—यदा-कदा शब्देषु वाक्येषु वा बलाघात-कारणादपि ध्वनि-विकारः उपजायते । यथा—'है ही' इति स्थाने हयी है, 'करेंगे' इति स्थाने करबै करेंगे, 'जायेंगे' इति स्थाने जइबै करेंगे, 'द्वौ' इति स्थाने दू ठे (दू गो), 'पञ्च' इति स्थाने पान्ठो (पाँच गो) । एतदतिरिक्तं बलाघयुतः ध्वनिः एव प्राधान्यम् अवशिष्टतां वा प्राप्नोति, अन्याः ध्वनयः निर्बलाः क्षीणाः वा भवन्ति । यथा—'चतुरीय' इति स्थाने चतुर्य, 'तुरीय' इति स्थाने तुर्य, 'अभ्यन्तर' इति स्थाने भीतर, 'उपरि' इति स्थाने पर इत्यादयः ।

(ग) **अपूर्णानुकरणम्** (Wrong-imitation)—भाषा तु अनुकरणबलादेव आयाति । यतः भाषा सर्वथा अर्जित-सम्पत्तिरस्ति । एतस्माद् कारणादेव अशिक्षितानां जनानाम् उच्चारणानि प्रायेण दोषयुक्ताः भवन्ति । अनेन अपूर्णानु-करणेन भाषायामपि परिवर्तनं दरीदृश्यते । अद्यापि M.A., Ph.D. उपाधिधारकाः जनाः अपि दन्त्य-तालव्य-मूर्द्धन्य सकारेषु, बकार-वकारयोः, णकार-नकारयोः, रकार-डकारयोः, यकार-जकारयोश्च भेदं कर्तुं न शक्नुवन्ति । इदमेव अपूर्णानु-करणम् इत्युच्यते ।

(घ) **प्रयत्नलाघवम्** (Economy of effort)—ध्वनि-विकारोत्पादकेषु कारकेषु प्रयत्नलाघवस्य महत्त्वपूर्णं स्थानमस्ति । यतः सर्वे कार्यसम्पादनेऽत्यल्पं श्रमं चिकीर्षन्ति । एतस्माद् प्रयत्नलाघवाद् शब्दोच्चारणे सौविध्यं सारल्यं चायाति । काल-क्रमेण इमे शब्दाः स्थायिरूपेण भाषायां प्रस्थापिताः भवन्ति । अतः अनेन प्रयत्नलाघवेन सर्वाधिकध्वनि-परिवर्तनं भवति । आगम-लोप-विकार-विपर्ययादिभेदेनास्य बहवः भेदाः भवन्ति, ये अधोलिखिताः सन्ति—

(i) **आगमः** (Augment)—आगम-बलेन उच्चारणे सौविध्यमायाति । अतः 'स्नानम्' इति स्थाने अस्नानम्, 'स्पष्टम्' इति स्थाने अस्पष्टम्, 'स्तुतिः' इति स्थाने अस्तुतिः, 'स्कूल' इति स्थाने इस्कूल, 'ग्यारह' इति स्थाने इग्यारह, 'स्थिर' इति स्थाने इस्थिर, 'स्थानम्' इति स्थाने 'अस्थानम्' इति बहुधा श्रूयते दृश्यते च ।

(ii) **लोपः** (Elision)—लोपोऽपि ध्वनिपरिवर्तनस्य महत्कारणम् । यथा—'स्थलम्' इत्यस्य स्थाने थलम्, 'दुग्ध' इति स्थाने दूध, 'ज्येष्ठ' इति स्थाने जेठ, 'श्रेष्ठ' इति स्थाने सेठ, इत्यादीनि लोपस्य एव उदाहरणानि सन्ति ।

(iii) **विकारः** (Deviation)—विकृतिरिति विकारः । यथा—'हस्त' इत्यस्य स्थाने हाथ, 'गम्भीर' इति स्थाने गहिर, 'आभीर' इति स्थाने अहिर, 'शाक' इति स्थाने साग, 'स्तन' इति स्थाने थन इत्यादयः विकारस्यैव प्रभावः ।

(iv) **विपर्ययः** (Metathesis)—शब्दोच्चारणे वर्णपिर्यये-नापि ध्वनि-विकारः संजायते । यथा—'ह्रद' इत्यस्य स्थाने दह, 'पिशाच' इत्यस्य स्थाने पिचास, 'देहली' इति स्थाने देलही, 'डूबना' इति स्थाने बूड़ना, 'पहुँचना' इति स्थाने चहुपना इत्यादयः वर्णविपर्ययाः ध्वनि-विकारमुत्पादयन्ति ।

(v) **समीकरणम्** (Assimilation)—यदा भिन्न-ध्वनयः समीपस्थाः भवन्ति तदा समीकरणबलेन एकस्य भिन्न-ध्वनेः अन्य-ध्वनौ लोपः भवति । प्रकृयेयं समीकरणमित्युच्यते । यथा—'दुग्ध' इत्यस्य स्थाने दूध, 'कर्म' इति स्थाने काम, दूर्बा इति स्थाने दूब, 'अग्नि' इति स्थाने आग, 'रात्रि' इति स्थाने रात, 'पुत्र' इति स्थाने पूत, 'पत्र' इति स्थाने पत्ता, 'निद्रा' इति स्थाने नींद इत्यादिः ।

(vi) **विषमीकरणम्** (Dissimilation)—द्वयोः सन्निहित-वर्णयोः ध्वनिसाम्ये सति एकस्मिन् वर्णे ध्वनिपरिवर्तनम् विषमीकरणम् । यथा—'लाला' इत्यस्य स्थाने लार 'काक' इति स्थाने काग, 'कंकण' इति स्थाने कंगन, इत्यादयः ।

(vii) **स्वरभक्तिः** (Anaptyxis)—संयुक्तव्यंजनोच्चारणे या असुविधा प्रादुर्भवति, तस्याः निराकरणार्थे संयुक्तवर्णस्य मध्ये एकस्य स्वरस्य स्थापना स्वरभक्तिः । यथा—'भ्रम' इत्यस्य स्थाने भरम, 'धर्म' इति स्थाने धरम, 'कर्म' इति

Scanned with OKEN Scanner

स्थाने करम, 'गर्मी' इति स्थाने गरमी, 'मूर्ति' इति स्थाने मूरति, 'राजेन्द्र' इति स्थाने राजेन्दर 'प्राण' इति स्थाने परान, 'स्मरण' इति स्थाने सुमिरन, 'श्रवण' इति स्थाने शरवन, 'नर्क' इति स्थाने नरक इत्यादयः ।

(viii) **समाक्षरलोपः** (Haplolog)–द्वयोः समध्वन्योः विद्यमाने सति एकस्य लोपः समाक्षरलोपः इत्युच्यते । यथा–'शेववृध' इत्यस्य स्थाने शेवृध, 'जहीहि' इति स्थाने जहि, 'मानससरोवर' इति स्थाने मानसरोवर, 'नाककटा' इति स्थाने नकटा, 'खरीददार' इति स्थाने खरीदार, 'शष्पपिंजर' इति स्थाने शष्पिंजर, 'त्रित्रृच' इति स्थाने त्रिच इत्यादिः ।

(ix) **महाप्राणीकरणम्** (Aspiration)–अल्पप्राण-ध्वनेः स्थाने महाप्राण-ध्वनेः वर्णस्य वा स्थापनम् महाप्राणीकरणम् । यथा–'पितर्' इत्यस्य स्थाने फादर (Father), 'परसु' इति स्थाने फरसा, 'वाष्प' इति स्थाने भाप, 'शुष्क' इति स्थाने सूखा, 'वेश' इति स्थाने भेष, 'त्रि' इति स्थाने थ्री (Three) 'तनु' इति स्थाने थिन (Thin), 'पद' इति स्थाने फुट (Foot) इत्यादिः ।

(x) **अल्पप्राणीकरणम्** (Deaspiration)–महाप्राण-वर्णस्य स्थाने अल्पप्राणवर्णस्य प्रयोगः 'अल्पप्राणीकरणम्' इत्युच्यते । यथा–'धधार' इत्यस्य स्थाने दधार, 'भभूव' इति स्थाने बभूव, 'स्वादिष्ठ' इति स्थाने स्वादिष्ट, 'धधौ' इति स्थाने दधौ, 'सिन्धु' इति स्थाने हिन्दु, 'बुध्धिः' इति स्थाने बुद्धिः इत्यादि ।

(xi) **घोषीकरणम्** (Vocalization)–अघोष-वर्णानां घोषवर्णेषु परिवर्तनम् इति घोषीकरणम् । यथा–'शती' इत्यस्य स्थाने शदी, 'कंकण' इति स्थाने कंगन, 'काक' इति स्थाने काग, 'नकद' इति स्थाने नगद, 'शाक' इति स्थाने साग इत्यादिः ।

(xii) **अघोषीकरणम्** (Devocalization)–घोष-वर्णानां अघोष-वर्णेषु परिवर्तनमिति अघोषीकरणम् । यथा–'मदद' इत्यस्य स्थाने मदत, 'वाग् + पति' इत्यस्य स्थाने वाक्पति 'उद् + कट' इत्यस्य स्थाने उत्कट इत्यादिः ।

(xiii) **अनुनासिकीकरणम्** (Nasalization)–अननुनासिक-ध्वनीनां (वर्णानां) अनुनासिकध्वनिषु परिवर्तनम् इत्यनुनासिकीकरणम् । यथा–'अश्रु' इत्यस्य स्थाने आँसू 'निद्रा' इत्यस्य स्थाने नींद, 'सर्प' इत्यस्य स्थाने साँप, 'उच्च' इत्यस्य स्थाने ऊँचा, 'उष्ट्र' इत्यस्य स्थाने ऊँट, 'अक्षि' इति स्थाने आँख, 'भ्रू' इति स्थाने भौंह, 'इष्टिका' इत्यस्य स्थाने ईंट इत्यादिः ।

अध्ययनसौकर्य-दृष्ट्या ध्वनि-परिवर्तकानि कारणानि आरेखबद्धकृतान्यत्र–

**भाषा-परिवर्तकानि कारणानि**

